# Shri Mayuresha Stuti Devarshayakrita

# દેવર્ષયકૃતા શ્રીમયૂરેશસ્તુતિઃ

## Document Information

Text title : Shri Mayuresha Stuti Devarshayakrita

File name : mayUreshastutiHdevarShayakRRitA.itx

Category : ganesha, mudgalapurANa, stuti

Location : doc_ganesha

Proofread by : Yash Khasbage, Preeti Bhandare

Description/comments : mudgalapurANaM ShaShTaH khaNDaH | adhyAyaH 41 | 6.41 37-51||

Latest update : June 4, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 5, 2024

*sanskritdocuments.org*

# દેવર્ષયકૃતા શ્રીમયૂરેશસ્તુતિઃ

॥ શ્રીગણેશાય નમઃ ॥
દેવર્ષય ઊચુઃ ।
નમસ્તે શિખિવાહાય મયૂરધ્વજધારિણે ।
મયૂરેશ્વરનામ્ને વૈ ગણેશાય નમો નમઃ ॥ ૩૭॥
અનાથાનાં પ્રણાથાય ગતાહઙ્કારિણાં પતે ।
માયાપ્રચાલકાયૈવ વિઘ્નેશાય નમો નમઃ ॥ ૩૮॥
સર્વાનન્દપ્રદાત્રે તે સદા સ્વાનન્દવાસિને ।
સ્વસ્વધર્મરતાનાં ચ પાલકાય નમો નમઃ ॥ ૩૯॥
અનાદયે પરેશાય દૈત્યદાનવમર્દિને ।
વિધર્મસ્થસ્વભાવાનાં હર્ત્રે વિકટ તે નમઃ ॥ ૪૦॥
શિવપુત્રાય સર્વેષાં માત્રે પિત્રે નમો નમઃ ।
પાર્વતીનન્દનાયૈવ સ્કન્દાગ્રજ નમો નમઃ ॥ ૪૧॥
નાનાવતારરૂપૈસ્તુ વિશ્વસંસ્થાકરાય તે ।
કાશ્યપાય નમસ્તુભ્યં શેષપુત્રાય તે નમઃ ॥ ૪૨॥
સિન્ધુહન્ત્રે ચ હેરમ્બાય પરશુધરાય તે ।
દેવદેવેશ પાલાય બ્રહ્મણાં પતયે નમઃ ॥ ૪૩॥
યોગેશાય સુશાન્તિભ્યઃ શાન્તિદાત્રે કૃપાલવે ।
અનન્તાનનબાહો તેऽનન્તોદર નમો નમઃ ॥ ૪૪॥
અનન્તવિભવાયૈવ ચિત્તવૃત્તિપ્રચાલક ।
સર્વહૃત્સ્થાય સર્વેષાં પૂજ્યાય તે નમો નમઃ ॥ ૪૫॥
સર્વાદિપૂજ્યરૂપાય જ્યેષ્ઠરાજાય તે નમઃ ।
ગણાનાં પતયે ચૈવ સિદ્ધિબુદ્ધિવરાય ચ ॥ ૪૬॥
કિં સ્તુમસ્ત્વાં મયૂરેશ યત્ર વેદાદયઃ પ્રભો ।
યોગિનઃ શાન્તિમાપન્ના અતો નમામહે વયમ્ ॥ ૪૭॥
તેન તુષ્ટો ભવ સ્વામિન્ દયાઘન પ્રવર્તક ।

ત્વદીયાઙ્ગસમુદ્ભૂતાન્ રક્ષ નો નિત્યદા પ્રભો ॥ ૪૮॥
એવં સ્તુત્વા પ્રણેમુસ્તં તતો દેવોઽબ્રવીન્ સ તાન્ ।
વરાન્ વૃણુત દેવેશા મુનિભિશ્ચ સમન્વિતાઃ ॥ ૪૯॥
(ફલશ્રુતિઃ)
ભવત્કૃતમિદં સ્તોત્રં સર્વસિદ્ધિપ્રદાયકમ્ ।
ભવિષ્યતિ મહાભાગા મમ પ્રીતિવિવર્ધનમ્ ॥ ૫૦॥
યઃ પઠેચ્છૃણુયાદ્વાપિ શ્રાવયેત્સ લભત્ પરામ્ ।
ભુક્તિં મુક્તિં મદીયાં તુ નરો ભક્તિં ન સંશયઃ ॥ ૫૧॥

ઇતિ દેવર્ષયકૃતા શ્રીમયૂરેશસ્તુતિઃ સમ્પૂર્ણા ॥

- ॥ મુદ્ગલપુરાણં ષષ્ટઃ ખણ્ડઃ । અધ્યાયઃ ૪૧ । ૬.૪૧ ૩૭-૫૧॥

- .. mudgalapurANaM ShaShTaH khaNDaH . adhyAyaH 41 . 6.41 37-51..

Proofread by Yash Khasbage, Preeti Bhandare

*Shri Mayuresha Stuti Devarshayakrita*
pdf was typeset on June 5, 2024

Please send corrections to *sanskrit@cheerful.com*